"क्षत्त्रवृद्धात्मजस्तत्र सुहोत्रोऽथ महायशाः" हरिवं० २९अ० क्षत्त्रवृध् अप्यत्र। "यः पुरूरवसः पुत्र आयुस्तस्याभवन् सुताः। नहुषः क्षत्त्रवृद्धश्च रजिरम्भश्च वीर्य्यवान्। अनेना इति राजेन्द्र! शृणु क्षत्त्रवृधोऽन्वयम्। क्षत्त्रवृद्धसुतस्यासन् सुहोत्रस्यात्मजास्त्रयः" भाग० ९।१७ २ क्षत्त्रेषु वृद्धः। २स्वेऽचाक्षिवे त्रयोदशस्य रुचनामकस्य मनोः ३पुत्रभेदे "त्रयोदशस्य पुत्रास्ते विज्ञेयास्तु रुचेः सुताः। चित्रसेनो विचित्रश्च नाभोधर्म्मभृतो धृतिः। सुनेत्रः क्षत्त्रवृद्धश्च सुतपा निर्भयो दृढः" हरिवं० ७अ०

**क्षत्त्रसव** पु० ६त०। क्षत्त्रियकर्त्तव्ये यज्ञभेदे

**क्षत्त्रान्तक** पु० ६त०। परशुरामे "क्षत्त्रान्तकस्याभिभवेन चैव" भट्टिः ६त०। क्षत्त्रान्तकारिन् अप्यत्र "महानन्दसुतः शूद्रागर्भोद्भवोऽतिलुब्धः परशुराम इव अपरोऽखिलक्षत्त्रान्तकारी भविता ततः प्रभृति शूद्रा भूपाला भविष्यन्ति" शु० त० विष्णुपु०

**क्षत्त्रिय** पुंस्त्री० क्षत्त्रे राष्ट्रे साधु तस्यापत्यं जातौ वा घः। १ब्राह्मणानन्तरवर्णे अमरः ठाप्। "नृपायां नृपसंसर्गात् प्रच्छन्नात् गूढजातकः। सोऽपि क्षत्त्रिय एव स्यादभिषेके च वर्ज्जितः" उशनसोक्ते नृपात् अपरणीतायां क्षत्त्रियजातिस्त्रियां गूढोत्पन्ने पुत्रे च"। पा० उक्तोपस्तु जातावेव अपत्यमात्रे इञ्। क्षात्त्रि क्षत्त्रजातेरपत्यमात्रे पुंस्त्री स्त्रियां वा ङीप्। स्वार्थे क। तत्रार्थे स्त्रियां टापि यपूर्वत्वात् वा अत इत्त्वम्। क्षत्त्रियिका क्षत्त्रियका। ततो भावे त्व क्षत्त्रियत्व न० तल् क्षत्त्रियता स्त्री तद्भावे। ब्राह्मणत्ववत् क्षत्त्रियत्वस्य जातिविशेषत्वेऽपि गुणविशेषेण शूद्रस्यापि क्षत्त्रियत्वादि भवति। "शूद्रयोनौ हि जातस्य सद्गुणानुतिष्ठतः। वैश्यत्वं लभते ब्रह्मन्! क्षत्त्रियत्वं तथैव च। आर्जवे वर्त्तमानस्य ब्राह्मण्यमभिजायते" भा० व० २११ अ०। सद्गुणाश्च तत्रैवोक्ताः। "शूद्रस्येति कर्म्मणि षष्ठी वैश्यत्वादि कर्त्तृ सद्गुणवन्तं वैश्यत्वादयः स्वयमायान्तीति गुणकृत एव वर्णविभागो न जातिकृत इति भावः" नीलक०। तस्य पत्नी ङीष् वा आनुक्। क्षत्त्रियाणी क्षत्त्रियी अमरः। "अर्य्यक्षत्त्रियाभ्याम्" वा- स्वार्थे आनुक् ङीष् चेति सि० कौ०। पत्न्यान्तु ङीषेवेत्युक्तम्। जातौ तु योपधत्वात् न ङीष् किन्तु टाप्। क्षत्त्रिया क्षत्त्रशब्दे उदा०।

**क्षत्त्रियहण** पु० क्षत्त्रियं हन्ति अच् णत्वम्। परशुरामे। "किं न वै क्षत्त्रियहणो हरतुल्यपराक्रमः। विदितः पुत्र! रामस्ते यतस्त्वं योद्धुमिच्छसि" भा० द्रो० १७९अ०

**क्षत्त्रियासन** न० "क्षत्त्रियासनमावक्ष्ये यत्कृत्वा धनवान् भवेत्। केशेन पादयुगलं बद्ध्वा तिष्ठेदधोमुखः" रुद्रयामलोक्ते आसनभेदे

**क्षद** संभृतौ पेषणे भक्षणे च सौ० आ० सक० सेट्। क्षदते अक्षदिष्ट क्षत्त्रः। "तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन् वार्हत्युक्षाणं वा वेहतं वा क्षदन्त एवमेवास्मा एतत्" ऐत० ब्रा० १।१५ "शतं मेषान् वृक्ये चक्षदानम्" ऋ० १।११६।१६। "तस्मै इतं सुरां मध्वन्नमन्नं क्षदामहे" अथ०।१०।६।५

**क्षद्मन्** न० क्षद-भक्षणे-मनिन्। १उदके २अन्ने च निघ० "दाद्दहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव तिग्ममसनाय संश्यत्" ऋ०१।१३०।४ "क्षद्मेवार्थेषु तर्तरीथ उग्रा" ऋ०१०।१०६।१७

**क्षन्तृ** त्रि० क्षम-तृच्। क्षमाशीले सहिष्णौ अमरः "ये क्षन्तारो नाभिजल्पन्ति चान्यान्" भा०अ०।१०२अ०।

**क्षन्तव्य** त्रि० क्षम-तव्य। १सोढव्ये "तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः" कर्पूरस्तवः, भावे त्त कर्त्तव्य २क्षमायां न० "क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्य्यिणां नृणाम्"। मनुः "सर्व्वथा वर्त्तमानस्य राज्ञोह्यस्मद्विधैः सदा। क्षन्तव्यं पुत्र!" भा० अ० ४१अ०

**क्षप** क्षेपे अद० चुरा० उभ० सक० सेट्। क्षपयति ते अचिक्षपत् त। क्षपयाम् बभूव आस चकार चक्रे। "अरण्ये काष्ठवत् त्यक्त्वा क्षपयेयुस्त्र्यहं ततः" मनुः

**क्षप** सहने चुरा० इदित् उभ० सक० सेट्। क्षम्पयति ते अचक्षम्पत् त। क्षम्पयाम् बभूव आस चकार चक्रे। अयं मित् "तेन इणि अक्षम्पि-अक्षाम्पि। णमुलि क्षम्पं क्षम्पं-क्षाम्पं क्षाम्पम्" अनुपधाया अपि वा दीर्घः।

**क्षप्** स्त्री चु० क्षप-क्विप्। रात्रौ "स क्षपः परि षस्वजे" ऋ०८।४१।३। "क्षपोरात्रीः" भा० "क्षप उस्रा वरिवस्यन्तु देवाः" ६।५२।१५।

**क्षप** पु० चु० क्षप-कर्म्मणि अच्। उदके निघ०

**क्षपण** पु० क्षपयति विषयरागं क्षप-ल्यु। बौद्धसंन्यासिनि दिगम्बरे स्वार्थे क। तथार्थे "एकः क्षपणक। शाकाहर्त्रि तत्र क्षपणक! दश शाकाशाः। यत्र क्षपणक! दश शाकाशास्तत्र क्षपणक। का शाकाशा" उद्भ० "स पथि नग्नं क्षपणकमपश्यत्" भा० आ० ७८९श्लो० "नग्नक्षपणके देशे-